श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचितं

# ॥ श्री सौभाग्यलक्ष्मी मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सौभाग्यलक्ष्मी मङ्गळम् ॥

क्षीरोदमथनोद्भूते दिशागजसुपूजिते।
विष्णुवक्षः पदायास्ते नित्यं भवतु मङ्गलम् ॥ 1 ॥

सावराधसुराधीशसंस्तुते निजभूतये।
सुसमृद्धिप्रदायास्ते नित्यं भवतु मङ्गलम् ॥ 2 ॥

पूर्णे पूर्णप्रिये तूर्णं पूर्णकामे मनोरमे।
पूर्णलोकाश्रयायास्ते नित्यं भवतु मङ्गलम् ॥ 3 ॥

मङ्गलायतने सर्वमङ्गलाभिष्टुते रमे।
मङ्गलत्वप्रदायास्ते नित्यं भवतु मङ्गलम् ॥ 4 ॥

श्रुतिस्मृतिपुराणादिप्रथिताद्भुतवैभवे।
सर्वसंपत्प्रदायास्ते नित्यं भवतु मङ्गलम् ॥ 5 ॥

कल्याणमण्डपास्थाने सर्वकल्याणदायिनि।
कल्याणतमरूपिण्या नित्यं भवतु मङ्गलम् ॥ 6 ॥

दिव्यहर्म्यतलावासे दिव्यदृष्टिप्रदायिनि।
दिव्यनामयुतायास्ते नित्यं भवतु मङ्गलम् ॥ 7 ॥

सर्वसौभाग्यदे देवि भारयपत्तनवासिनि।
भद्रपीठस्थितायास्ते नित्यं भवतु मङ्गलम् ॥ 8 ॥

पद्मे पद्मप्रिये पद्मासनमुख्यसुपूजिते।
पद्माक्षदयितायास्ते नित्यं भवतु मङ्गलम् ॥ 9 ॥

वेदान्तलक्ष्मणाभिख्ययतिराडाश्रमाश्रये।
वेदान्तदेशिकाराध्ये नित्यं भवतु मङ्गलम्॥ **10** ॥

श्रीवासराघवप्रोक्तं इदं सौभाग्यदम् सदा।
पठन्तो मङ्गलं भक्त्या ते भवन्ति श्रियोन्नताः॥ **11** ॥

॥ इति श्री सौभाग्यलक्ष्मी मङ्गळं समाप्तम्॥